# Shriramanandavedantasarah

# શ્રીરામાનન્દવેદાન્તસારઃ

## Document Information

Text title : Shri Saketanivasacharyavirachitah Shriramanandavedantasarah

File name : shrIrAmAnandavedAntasAraHsAketanivAsAchArya.itx

Category : misc, rAmAnanda, shataka

Location : doc_z_misc_general

Author : sAketanivAsAchArya

Transliterated by : Mrityunjay Pandey

Proofread by : Mrityunjay Pandey

Description/comments : From Chatuh Sampradaya Dig-Darshanm

Latest update : December 3, 2023

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 3, 2023

*sanskritdocuments.org*

# શ્રીરામાનન્દવેદાન્તસારઃ

(શ્રીટીલાચાર્ય) (સિધ્દ્ધાન્ત રત્નમાલા)
પ્રણમ્ય ભાષ્યકૃદ્ રામાનન્દં ગુરું ચ રાઘવમ્ ।
ઔશ્રીરામાનન્દવેદાન્તસારં વક્ષ્યે યથામતિ ॥ ૧॥

તત્ત્વજ્ઞાનં ચ મોક્ષે હિ મુમુક્ષોર્હિતકારકમ્ ।
તદ્વિજ્ઞાનર્થા મિત્યેતચ્છ્રુતેરજર્યં ચ તદ્ ગુરોઃ ॥ ૨॥

પ્રમાણપ્રતિપન્નોઽર્થ બુધૈસ્તત્ત્વં પ્રકીર્ત્તિતમ્ ।
તત્ત્વં ચ દ્વિવિધં પ્રોક્તં દ્રવ્યાદ્રવ્યવિભેદતઃ ॥ ૩॥

તત્ર દ્રવ્યમુપાદાનમદ્રર્વ્યં તદ્વિલક્ષણમ્ ।
જાજડવિભેદાચ્ચ દ્રવ્યં દ્વિધા મતં બુધૈઃ ॥ ૪॥

સ્વયમ્પ્રકાશમજડં જડં તસ્માદ્વિલક્ષણમ્ ।
પ્રકૃતિકાલભેદાચ્ચ જડં તત્ર દ્વિધા મતમ્ ॥ ૫॥

વિજ્ઞેયા પ્રકૃતિસ્તત્ર સમગુણત્રયાશ્રયઃ ।
ચતુર્વિંશતિધા સા હિ સાવયવા મતા બુધૈઃ ॥ ૬॥

વિકારોત્પાદકત્વાત્ સા પ્રકૃતિરિતિ કથ્યતે ।
અવિદ્યા કથ્યતે સા હિ યતો જ્ઞાનવિરોધિની ॥ ૭॥

માયાઽભિધીયતે સા યત્ વિચિત્રસૃષ્ટિકારિણી ।
અવ્યક્તં સેશ્વરેચ્છાતઃ કાર્યોન્મુખી યદા ભવેત્ ॥ ૮॥

મહદુત્પદ્યતેઽવ્યક્તાત્ ત્રિધા તદ્ ગુણભેદતઃ ।
અહઙ્કારસ્ત્રિધા તસ્માત્ સાત્વિકાદિવિભેદતઃ ॥ ૯॥

એકાદશેન્દ્રિયાણિ સ્યુઃ સાત્વિકાહઙ્કૃતેઃ કિલ ।
જ્ઞાનકર્મેન્દ્રિયત્વાભ્યાં દ્વિધા તાનિ મતાનિ હિ ॥ ૧૦॥

જ્ઞાનપ્રસરણે હેતુરાદિમં ષડ્વિધં ચ તત્ ।

મનઃશ્રવણચક્ષુસ્ત્વગ્રસનઘ્રાણભેદતઃ ॥ ૧૧॥

જ્ઞાનેન્દ્રિયં સુખાદેશ્ચ શબ્દાદેગ્રહકં મતમ્ ।
કર્મણ્યુચ્ચારણાદૌ તુ શક્તં કર્મેન્દ્રિયં ખલુ ॥ ૧૨॥

વાક્પાણિપાદપાયૂપસ્થભેદાત્ પઞ્ચધા ચ તત્ ।
તામસાહઙ્કૃતેર્જાતં તન્માત્રં શબ્દસંજ્ઞકમ્ ॥ ૧૩॥

તસ્માન્નભસ્તતઃ સ્પર્શતન્માત્રં ચ તતો મરુદ્ ।
તતો રૂપં તતશ્ચાનિર્જલહેતુસ્તતો રસઃ ॥ ૧૪॥

જલાદ્ ગન્ધસ્તતો ભૂતં જાયતે ક્ષિતિસંજ્ઞકમ્ ।
એતૈઃ પઞ્ચીકૃતૈર્ભૂતૈરણ્ડોત્પત્તિર્મતા બુધૈઃ ॥ ૧૫॥

ત્રિભિઃ સત્વાદિભિર્હીનો જડઃ કાલતયા મતઃ ।
દ્વિવિધઃ સમ્મતઃ કાલશ્ચાખણ્ડાખણ્ડભેદતઃ ॥ ૧૬॥

તત્રાખણ્ડો વિભુનિત્યો ભૂતાદિબુદ્ધિકારકઃ ।
અનિત્યાસ્તુ મુહૂર્ત્તાદ્યા ભેદાઃ ખણ્ડસ્ય કીર્ત્તિતાઃ ॥ ૧૭॥

અજડં તુ દ્વિધા બોધ્યં પરાક્પ્રત્યગ્વિભેદતઃ ।
ભાસમાનં પરસ્મૈ હિ પરાક્તત્ત્વં દ્વિધા મતમ્ ॥ ૧૮॥

તત્ર નિત્યવિભૂતિર્હિ શુદ્ધસત્ત્વમયી મતા ।
ધર્મભૂતં ચ યજ્જ્ઞાનં તન્મતશ્ચાપરઃ પરાક્ ॥ ૧૯॥

અચેતનં મતં જ્ઞાનં શુદ્ધસત્વં ચ પણ્ડિતઃ ।
પ્રમાણં તુ શ્રુતિશ્ચાદ્યે ત્રિપાદસ્યામૃતં દિવિ ॥ ૨૦॥

મતા નિત્યવિભૂતિઃ સા મુક્તાનાં બ્રહ્મણસ્તયા ।
ભોગ્યભોગોપકરણભોગસ્થાનમયી ખલુ ॥ ૨૧॥

ઊર્ધ્વદેશેઽપરિચ્છિન્ના સાઽધસ્તાન્ન મતા તથા ।
નિત્યા ચૈતન્યહીના ચ સાઽઽનન્દાદિપદેરિતા ॥ ૨૨॥

જ્ઞાતુર્જ્ઞેયાવભાસો હિ જ્ઞાનત્વેન પ્રકીર્ત્તિતઃ ।
ધર્મધર્મિવિભેદાદ્ધિ જ્ઞાનં દ્વિધેતિ વક્ષ્યતે ॥ ૨૩॥

આત્મધર્મતયા ભાતિ પ્રભાવત્ તત્ર ચાદિમમ્ ।
સત્યં જ્ઞાનમિ તિશ્રુત્યા જ્ઞાનસ્ય દ્રવ્યતા મતા ॥ ૨૪॥

ન વિજ્ઞાતુરિ તિશ્રુત્યાં શ્રુતા જ્ઞાનસ્ય નિત્યતા ।
ઈશ્વરે નિત્યજીવેષુ જ્ઞાનં નિત્યં મતં વિભુ ॥ ૨૫॥

કર્માવૃતં હિ બદ્ધેષુ મુક્તેષુ પ્રાક્ તદાવૃતમ્ ।
નષ્ટોત્પન્નપ્રતીતિસ્તુ સઙ્કોચાચ્ચ વિકાસતઃ ॥ ૨૬॥

સ્વાપે જ્ઞાનતિરોધાનં તમોવિશેષસન્નિધેઃ ।
જ્ઞાને દ્રવ્યત્વસત્ત્વેઽપિ પ્રભેવ ગુણતા મતા ॥ ૨૭॥

વિષયસત્યતાહેતોર્જ્ઞાને સ્વતઃ પ્રમાણતા ।
સ્વાન્યનિર્વાહકત્વેન સૂર્યવત્ સ્વપ્રકાશતા ॥ ૨૮॥

જીવોઽણુશ્ચેતનો વ્યાપ્તો જ્ઞાનેનાખિલવર્ષ્મણ ।
ઝટિતિ તેન જાનાતિ સર્વદેહસુખાદિકમ્ ॥ ૨૯॥

દધાતિ યુગપદ્ યોગી શરીરાણિ બહૂનિ ચ ।
યાતિ લોકાન્તરં જીવ આયાત્યત્ર તતઃ પુનઃ ॥ ૩૦॥

તતો જીવવિભુત્વં ન મન્યતે જ્ઞાનિભિર્જનૈઃ ।
જીવાત્મનસ્તતોઽણુત્વં દોષહીનં મતં બુધૈઃ ॥ ૩૧॥

અદૃષ્ટં રાઘવેચ્છેવ સર્વત્ર વ્યાપકં હિ તત્ ।
તતસ્તત્ તત્ પદાર્થાસ્તુ તત્ર તત્રોદ્ભવન્તિ ચ ॥ ૩૨॥

જીવસ્ય મધ્યમે માને ત્વનિત્યત્વં ઘટાદિવત્ ।
અકૃતસ્ય ચ સમ્પ્રાપ્તિર્નાશસ્તથા કૃતસ્ય ચ ॥ ૩૩॥

આત્મનિત્યત્વવક્ત્રીણાં શ્રુતીનાં ચ વિરોધિતા ।
અન્યદેહે ચ સમ્પ્રાપ્તે શૈથિલ્યમાત્મનશ્ચ હિ ॥ ૩૪॥

જાનામીતિ પ્રતીત્યા ચ જીવો જ્ઞાનાશ્રયો મતઃ ।
શ્રુતૌ જ્ઞાનસ્વરૂપત્વં વર્ણિતં પ્રત્યગાત્મનઃ ॥ ૩૫॥

જ્ઞાનદ્વયં મતં તસ્માદ્ ધર્મધર્મિપ્રભેદતઃ ।
ઉભયોર્જ્ઞાનયોર્વેદે વર્ણિતા નિત્યતાઽપિ ચ ॥ ૩૬॥

એકનાશે હિ નષ્ટા સ્યાદિન્દ્રિયસઙ્ઘજીવતા ।
એકૈકસ્ય તુ જીવત્વે તત્તન્નાશે વિનાશિતા ॥ ૩૭॥

મતે દેહસ્ય જીવત્વે વ્યભિચારો મૃતે ભવેત્ ।
અનિત્યત્વં ભવેજ્જીવે દેહેન સદૃશં તથા ॥ ૩૮॥

મમન્દ્રિયં તનુઃ પ્રાણો બુદ્ધિશ્ચેતિપ્રતીતિતઃ ।
મન્યતે નાત્મનઃ પ્રાજ્ઞૈરિન્દ્રિયાદિસ્વરૂપતા ॥ ૩૯॥

શ્રુતિસ્મૃત્યો રજોનિત્ય મિત્યેવં નિત્યતા મતા ।
પ્રત્યગાત્માઽજડસ્તસ્માજ્ જ્ઞેયો જ્ઞાતા ચ સમ્મતઃ ॥ ૪૦॥

સુખમસ્વાપ્સમિત્યેતત્પ્રતીત્યા સુખરૂપકઃ ।
યથેષ્ટવિનિયોગઃ શેષો રામસ્ય શેષિણઃ ॥ ૪૧॥

ધાર્યત્વાચ્ચ નિયામ્યત્વાદાત્મા દેહઃ પરાત્મનઃ ।
ભિન્નો જીવો વિભોઃ સ્વસ્ય ચાત્મનઃ પરમાત્મનઃ ॥ ૪૨॥

તત્ત્વત્પદોક્તયોરૈક્યં પરાન્તર્યામિણોઃ ખલુ ।
તત્ત્વમસીતિવાક્યે હિ નૈક્યં જીવેશયોર્મતમ્ ॥ ૪૩॥

પ્રભાવતઃ પ્રભાતુલ્યો વિશિષ્ટસ્ય વિશેષવત્ ।
બ્રહ્મણેંઽશો મતો જીવો જીવસ્ય બ્રહ્મતા ન તત્ ॥ ૪૪॥

પ્રતિબિમ્બસ્ત્વવિદ્યાયાં જીવશ્ચ બ્રહ્મણો નનુ ।
મૈવં સિધ્યતિ નાવિદ્યા હ્યાશ્રયાનુપપતિતઃ ॥ ૪૫॥

પ્રતિબિમ્બે હિ દુઃખાદેરભાવાજ્જીવતા ન ચ ।
મૈવં યત્ પ્રતિબિમ્બોઽસૌ વિદ્વદ્ભિર્બિમ્બવન્મતઃ ॥ ૪૬॥

ઇતિ વક્તું ન શક્યં હિ કુતશ્ચેદુચ્યતે યતઃ ।
સર્વૈર્લોકૈર્વિલોક્યન્તે જીવા દુઃખાદિસંયુતાઃ ॥ ૪૭॥

ન ચ દુઃખાદયો બિમ્બે નિર્વિશેષે તુ બ્રહ્મણિ ।
પ્રતિબિમ્બે ન જીવત્વં તસ્માત્ સમ્ભવેન્ન હિ ॥ ૪૮॥

કિં ચ રૂપવિહીનસ્ય પ્રતિબિમ્બો ન જાયતે ।
દૃશ્યતે પ્રતિબિમ્બો નુ રૂપહીનવિહાયસઃ ॥ ૪૯॥

મૈવં યત્ પ્રતિબિમ્બોઽસૌ પ્રકાશાદેર્મતો બુધૈઃ ।
કુતો નીરૂપવાયોશ્ચ પ્રતિબિમ્બો ન દૃશ્યતે ॥ ૫૦॥

પરિચ્છિન્નવિધોરેવ પ્રતિબિમ્બો જલે ખલુ ।
પ્રતિબિમ્બઃ કથં જીવોઽપરિચ્છિન્નસ્ય બ્રહ્મણઃ ॥ ૫૧॥

પ્રતિબિમ્બોઽસ્તિ જીવશ્ચેદેકદેશસ્ય બ્રહ્મણઃ ।

હન્ત તદા હ્યનિત્યત્વં સાંશત્વાદ્ બ્રહ્મણો ભવેત્ ॥ ૫૨॥

અવિદ્યયાऽદ્વિતીયત્વં નશ્યતિ બ્રહ્મણો યતઃ ।
નાતોऽવચ્છેદિકાऽવિદ્યા જીવભાવે તુ બ્રહ્મણઃ ॥ ૫૩॥

બ્રહ્મણો ભેદશૂન્યત્વાજ્જીવસ્ય ન વિવર્ત્તતા ।
સર્પભ્રમો ન સર્પે હિ કિન્તુ રજ્જૌ બુધૈર્મતઃ ॥ ૫૪॥

આચાર્યસાર્વભૌમેન રામાનન્દેન ધીમતા ।
વેદાન્તદર્શનાનન્દભાષ્યે જીવાસ્ત્રિધા મતાઃ ॥ ૫૫॥

બદ્ધા મુક્તાસ્તથા નિત્યા બદ્ધા બદ્ધાશ્ચ કર્મણા ।
રામબ્રહ્માનુકમ્પાતઃ પુણ્યાત્ સતામનુગ્રહાદ્ ॥ ૫૬॥

મુમુક્ષા જાયતે ભવ્યા જીવસ્ય હૃદયે શુચૌ ।
તદા સત્સઙ્ગતિં કુર્વન્ ગુરું ચાસૌ પ્રપદ્યતે ॥ ૫૭॥

રામપાદપ્રપન્નોऽસૌ તતો ગુરુમુખાદ્ ભવેત્ ।
શ્રીમદ્રામપ્રપત્ત્યા ચ છિન્નમાયાન્વયસ્તતઃ ॥ ૫૮॥

તતોऽર્ચિરાદિમાર્ગં ચ યાતિ હાર્દાનુકમ્પયા ।
તતશ્ચ વિરજાસ્નાનાદ્ દિવ્યદેહો ભવેદ્ધિ સઃ ॥ ૫૯॥

સાકેતે ચ સમાપ્નોતિ રામં બ્રહ્મ પરાત્પરમ્ ।
સ્વં રૂપં તત્ર સમ્પ્રાપ્ય રામં ચાનુભવત્યપિ ॥ ૬૦॥

ભોગસામ્યમવાપ્નોતિ રામસ્ય બ્રહ્મણસ્તદા ।
તતો નાવર્ત્તતે મુક્તો મૃત્યુલોકેऽથ કર્હિચિત્ ॥ ૬૧॥

મામુપેત્ય તુ કૌન્તેય પુનર્જન્મ ન વિદ્યતે ।
ઇત્યેતદ્ ભગવદ્વાક્યં પ્રમાણં તત્ર ચાસ્તિ હિ ॥ ૬૨॥

સર્વલોકગતૌ શક્તો મુક્તઃ સૃષ્ટ્યાદિવર્જિતઃ ।
સંસારિતાં ચ ન પ્રાપ્તા નિત્યા હનુમાદાદયઃ ॥ ૬૩॥

ઈશ્વરો બ્રહ્મ રામશ્ચ શબ્દા હ્યેકાર્થબોધકાઃ ।
તત્ર વેદાન્તિભિશ્ચોક્તં બ્રહ્મ હિ વિભુ ચેતનમ્ ॥ ૬૪॥

મહાન્તં વિભુમિ ત્યેવં વિભુત્વં બ્રહ્મણઃ શ્રુતૌ ।
વિભુ બ્રહ્મ સ્વરૂપેણ સ્વભાવાચ્ચ મતં બુધૈઃ ॥ ૬૫॥

જ્ઞઃ કાલકાલ ઇત્યેવં શ્રુતં બ્રહ્મ હિ ચેતનમ્ ।
વેદાહં સમતીતાનિ ઇત્યુક્તાવપિ તાદૃશમ્ ॥ ૬૬॥

કાલસ્ય વિભુતાયાં ચાચેતનત્વાન્ન બ્રહ્મતા ।
જીવસ્ય ચેતનત્વેઽપિ બ્રહ્મતા નાવિભુત્વતઃ ॥ ૬૭॥

સદા દોષવિહીનશ્ચ સ્વત એવ હિ રાઘવઃ ।
સ્વતઃ સોઽથ મતો નિત્યં કલ્યાણગુણસાગરઃ ॥ ૬૮॥

રામેઽપહતપાપ્મે તિ હેયા ગુણા હિ વર્જિતાઃ ।
શ્રુતાસ્તુ સત્યકામશ્ચે ત્યેવં દિવ્યા ગુણાઃ ખલુ ॥ ૬૯॥

એતે ચાન્યે ચ ભગવન્ નિત્યા યત્ર મહાગુણાઃ ।
ઇત્યેવં રામચન્દ્રસ્ય ગુણાનાં નિત્યતા મતા ॥ ૭૦॥

સ્વાભાવિકી તિવેદોક્તેઃ સ્વાભાવિકા હરેર્ગુણાઃ ।
બ્રહ્મસ્વભાવો નાવિદ્યા તેઽવિદ્યોપાધિકા ન તત્ ॥ ૭૧॥

તદ્યથા રથસ્યારેષુ ઇત્યાદિશ્રુતિમાનતઃ ।
સર્વાધારો મતો રામઃ પ્રાણાખ્યઃ પરમેશ્વરઃ ॥ ૭૨॥

સ ભગવ કસ્મિન્ને તચ્છ્રુતિવાક્યપ્રમાણતઃ ।
સ્વે મહિમ્નિ સ્થિત્વાદ્ધિ રામાધારો ન કશ્ચન ॥ ૭૩॥

ચિદચિદાં ચ સર્વેષાં નિયન્તૃત્વં નિરઙ્કુશમ્ ।
આન્તરબાહ્યભેદાભ્યાં દ્વિધા તત્ પરમાત્મનઃ ॥ ૭૪॥

અન્તર્યામિતયા ચાદ્યં શ્રુત્યા સ્મૃત્યાઽન્તિમં મતમ્ ।
એષ સર્વેશ્વરઃ એષોઽન્તર્યામી તિ શ્રુતેશ્ચ હિ ॥ ૭૫॥

પ્રધાનક્ષેત્રજ્ઞપતિઃ ઇત્યેતચ્છ્રુતિમાનતઃ ।
રામશેષા મતાઃ સર્વે સર્વશેષી ચ રાઘવઃ ॥ ૭૬॥

સર્વન્દેહકતા રામે સર્વાત્મે તિ શ્રુતૌ શ્રુતા ।
જગત્ સર્વં શરીરં તે ઇતિવાક્યે ચ બ્રહ્મણઃ ॥ ૭૭॥

તચ્ચૈતન્યાપૃથક્સિદ્ધદ્રવ્યં હિ તત્તનુઃ કિલ ।
રામં પ્રતિ તથા ભૂતાઃ સર્વે રામતનુર્મતાઃ ॥ ૭૮॥

સર્વકર્મસમારાધ્યઃ સર્વકર્મફલપ્રદઃ ।
સર્વદેહશ્ચ સર્વસ્થો રામ એવ ન ચાપરઃ ॥ ૭૯॥

યતો વે યાદિરૂપેણ બ્રહ્મણિ નિખિલાત્મનિ ।
ભૃગુવલ્લ્યાં શ્રુતા રામે જગજ્જન્માદિહેતુતા ॥ ૮૦॥

ઉપાદાનં નિમિત્તં ચ જગતો રામ એવ હિ ।
નિમિત્તાન્તરસદ્ભાવે કુપ્યેદદ્વયતાશ્રુતિઃ ॥ ૮૧॥

વૈદિકં સમ્મતં પ્રાજ્ઞૈ રામે ચ હેતુતાદ્વયમ્ ।
સૃષ્ટ્યાદૌ હિ શ્રુતાવુક્તમૂર્ણનાભિનિદર્શનમ્ ॥ ૮૨॥

ઉપાદાનં યથા હ્યાત્મા નિમિત્તં ચ સુખં પ્રતિ ।
તથોપાદાનતા રામે જગતશ્ચ નિમિત્તતા ॥ ૮૩॥

સૂક્ષ્માચિચ્ચિદ્વિશિષ્ટો હિ રામો વિશ્વસ્ય કારણમ્ ।
સ્થૂલાચિચ્ચિદ્વિશિષ્ટશ્ચ શ્રીરામો જગદાત્મકઃ ॥ ૮૪॥

અભેદશ્ચાનયોર્યસ્માત્ કાર્યકારણબ્રહ્મણોઃ ।
વિશિષ્ટાદ્વૈત સિદ્ધાન્તઃ સમ્મતો વૈદિકૈસ્તતઃ ॥ ૮૫॥

ભેદસ્ય વાદિકાશ્ચાથાભેદસ્ય વાદિકાઃ ખલુ ।
સઙ્ગતાઃ શ્રુતયશ્ચાત્ર સિદ્ધાન્તે યુક્તયસ્તથા ॥ ૮૬॥

સદ્વારકમુપાદાનં જગતો રાઘવો યતઃ ।
તતો વિકારદોષસ્ય શ્રીરામે સમ્ભવો ન હિ ॥ ૮૭॥

રામો વિશ્વસ્ય હેતુત્વાન્નિર્વિશેષો ન સમ્મતઃ ।
સમાધિકનિષેધાત્ સ ન માયોપાધિકો મતઃ ॥ ૮૮॥

તમેવ વિદિત્વા ચેતદ્વેદવાક્યપ્રમાણતઃ ।
મુમુક્ષૂણામુપાસ્યશ્ચ શ્રીરામઃ સકલેશ્વરઃ ॥ ૮૯॥

રુક્મવર્ણમિતિશ્રુત્યા રામોઽલૌકિક વિગ્રહઃ ।
દિવ્યરૂપાદિવૈશિષ્ટ્યં “ભારૂપ” ઇતિ તત્ર હિ ॥ ૯૦॥

ન તસ્ય પ્રાકૃતા મૂર્તિર્માંસમેદોઽસ્થિસમ્ભવા ।
નિષિદ્ધઃ પ્રાકૃતો દેહો રામે દિવ્યતનાવિતિ ॥ ૯૧॥

તદ્વિશ્વરૂપવૈરૂપ્યં રૂપમન્યદ્ધરેર્મહત્ ।
વર્જિતં પ્રાકૃતં રૂપં દિવ્યરૂપે હરાવિતિ ॥ ૯૨॥

નાકારણાત્ કારણાદ્વા કારણાકારણાન્ન ચ ।

ઇત્યાદ્યુક્તયા ચ રામસ્ય દેહગ્રહોં નિજેચ્છયા ॥ ૯૩॥

શ્રુત્યન્વિતશ્ચ સર્વજ્ઞઃ સર્વશક્તિઃ શ્રુતિશ્રુતઃ ।
મુક્તિદઃ પરયા ભક્તયા શ્રિતાઘં નૈવ પશ્યતિ ॥ ૯૪॥

સાધનસપ્તકાજ્જાતા જ્ઞાનકર્માઙ્ગિણી તથા ।
રામસ્મૃતિરવિચ્છિન્ના ભક્તિઃ સમ્મતા બુધૈ ॥ ૯૫॥

સાધ્યસાધનભેદાભ્યાં સા દ્વિધા પરિકીર્ત્તિતા ।
નવધા સાધનભક્તિર્હિ શ્રવણાદિર્મતા બુધૈઃ ॥ ૯૬॥

સાધ્યભક્તિઃ પ્રપત્તિર્હિ રામાયાત્મનિવેદનમ્ ।
પ્રારબ્ધનાશિની ચૈષા ત્વાનુકૂલ્યાદિકાઙ્ગિની ॥ ૯૭॥

જનાન્ સંરક્ષિતું રામોઽવતારી પઞ્ચધા સ્થિતઃ ।
અન્તર્યામી પરો વ્યૂહો વિભવોઽર્ચાવતારકઃ ॥ ૯૮॥

અનન્તકરુણાશાલિસીતયા સહ શોભિતઃ ।
પરાત્પરે ચ સાકેતે રામો પરતયા મતઃ ॥ ૯૯॥

દિવ્યદેહગુણો દિવ્યશાસ્ત્રાસ્ત્રભૂષણસ્તથા ।
અર્ચિરાદિકપદ્ધત્યા સમ્પ્રાપ્યો મોક્ષસૌખ્યદઃ ॥ ૧૦૦॥

વાસુદેવાદયો વ્યૂહા ગુણદ્વયવિભૂષિતાઃ ।
ઉપાસિતું જનાનાં ચ કર્ત્તું ચ સર્જનાદિકમ્ ॥ ૧૦૧॥

મત્સ્યાદયોઽવતારાશ્ચ વિભવત્વેન સમ્મતાઃ ।
અન્તર્યામી ચ રામોહિ સર્વાન્તઃસ્થઃ પ્રકીર્ત્તિતઃ ॥ ૧૦૨॥

રામસ્યાર્ચાવતારસ્તુ હેમાદ્રિપ્રતિમાતનુઃ ।
ષાડ્ગુણ્યેન વિશિષ્ટશ્ચ સુલભો મુક્તિદસ્તથા ॥ ૧૦૩॥

અદ્રવ્યં દ્રવ્યભિન્નં હિ દશધા તત્ પ્રકીર્ત્તિતમ્ ।
સત્વં હિ જ્ઞાનકૃત્ તત્ર પ્રવૃત્તેઃ કારણં રજઃ ॥ ૧૦૪॥

પ્રમાદમોહહેતુસ્તુ તમશ્ચ પ્રકૃતેર્ગુણાઃ ।
શ્રોત્રસ્ય વિષયઃ શબ્દઃ સ્પર્શસ્ત્વચશ્ચ સમ્મતઃ ॥ ૧૦૫॥

રૂપં ચ ચક્ષુષસ્તદ્વદ્ રસનાયા રસો મતઃ ।
ઘ્રાણસ્ય ચ મતો ગન્ધશ્ચૈતે વ્યોમાદિપઞ્ચકે ॥ ૧૦૬॥

શક્તિસ્તુ હેતુહેતુત્વનિર્વાહિકા મતા બુધૈઃ ।
સંયુક્તંવ્યવહારસ્ય સંયોગઃ કારણં મતમ્ ॥ ૧૦૭॥

શક્તિસ્તથા ચ સંયોગઃ સર્વદ્રવ્યગુણૌ સ્મૃતૌ ।
સિદ્ધાન્તે જ્ઞાનતત્ત્વે તુ નાદ્રવ્યત્વં હિ સમ્મતમ્ ॥ ૧૦૮॥

શ્રીસાકેતનિવાસાખ્યટીલાચાર્યેણ નિર્મિતા ।
સિદ્ધાન્તરત્નમાલેયં ભૂયાત્ સિદ્ધાન્તબોધિની ॥ ૧૦૯॥

ઇતિ શ્રીસાકેતનિવાસાચાર્યવિરચિતઃ શ્રીરામાનન્દવેદાન્તસારઃ સમ્પૂર્ણઃ ।

Encoded and proofread by Mrityunjay Pandey

---

*Shriramanandavedantasarah*

pdf was typeset on December 3, 2023

Please send corrections to *sanskrit@cheerful.com*